# Vedamantramanjari 2

# વેદમન્ત્રમઞ્જરિ - ૨

## Document Information

Text title : veda mantra manjari - 2

File name : vedamantramanjari2.itx

Category : sUkta, veda, svara, mantra

Location : doc_veda

Transliterated by : Rekha Venkatesh

Proofread by : Rekha Venkatesh

Latest update : December 29, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# વેદમન્ત્રમઞ્જરિ - ૨

હરિઃ ૐ

॥ ૐ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

## ॥ મઙ્ગલાચરણમ્ ॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥ ૧॥

અગજાનન પદ્માર્કં ગજાનનમહર્નિશમ્ ।
અનેકદં તં ભક્તાનાં એકદન્તમુપાસ્મહે ॥ ૨॥

વાગર્થાવિવ સમ્પૃક્તૌ વાગર્થપ્રતિપત્તયે ।
જગતઃ પિતરૌ વન્દે પાર્વતીપરમેશ્વરૌ ॥ ૩॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુસ્સાક્ષાત્ પરબ્રહ્મ તસ્મૈ શ્રી ગુરવે નમઃ ॥ ૪॥

આઙ્ગિકં ભુવનં યસ્ય વાચિકં સર્વવાઙ્મયમ્ ।
આહાર્યં ચન્દ્ર તારાદિ તં નુમઃ સાત્વિકં શિવમ્ ॥ ૫॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુતે ॥ ૬॥

સરસ્વતિ નમસ્તુભ્યં વરદે કામરૂપિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥ ૭॥

ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવ દેવ ॥ ૮॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥ ૯॥

ૐ અસતો મા સદ્ગમય । તમસો મા જ્યોતિર્ગમય । મૃત્યોર્મા અમૃતં ગમય ॥ ૧૦॥

ૐ ભૂઃ ૐ ભુવઃ ૐ સુવઃ ૐ મહઃ ૐ જનઃ ૐ તપઃ ૐ સત્યમ્ ।
ૐ તત્સવિતુર્વરેણ્યં ભર્ગોદેવસ્ય ધીમહિ । ધિયો યો નઃ પ્રચોદયાત્ ॥૧૧॥

ૐ ગણાનાં ત્વા ગણપતિગ્ં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃણ્વન્નૂતિભિસ્સીદ સાદનમ્
॥ મહાગણપતયે નમઃ ॥

ૐ પ્રણો દેવિ સરસ્વતી વાજેભિર્વાજિનીવતી । ધીનામવિત્ર્યવતુ ॥

વાગ્દેવ્યૈ નમઃ ॥

ૐ નમો બ્રહ્મણે ધારણં મે અસ્ત્વનિરાકરણં ધારયિતા ભૂયાસં
કર્ણયોશ્શ્રુતં મા ચ્યોઢ્વં મમામુષ્ય ઓમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

## ॥ પુરુષસૂક્તમ્ ॥

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવીઃ
સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો
અસ્તુ દ્વિપદે । શં ચતુષ્પદે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સહસ્રશીર્ષા પુરુષઃ । સહસ્રાક્ષઃ સહસ્રપાત્ । સ ભૂમિં વિશ્વતો
વૃત્વા । અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ । પુરુષ એવેદગ્ં સર્વમ્ । યદ્ભૂતં યચ્ચ
ભવ્યમ્ । ઉતામૃતત્વસ્યેશાનઃ । યદન્નેનાતિરોહતિ । એતાવાનસ્ય મહિમા ।
અતો જ્યાયાગ્શ્ચ પૂરુષઃ ॥ ૧ ॥

પાદોઽસ્ય વિશ્વા ભૂતાનિ । ત્રિપાદસ્યામૃતં દિવિ । ત્રિપાદૂર્ધ્વ
ઉદૈત્પુરુષઃ । પાદોઽસ્યેહાઽઽભવાત્પુનઃ । તતો વિષ્વઙ્વ્યક્રામત્ ।
સાશનાનશને અભિ । તસ્માદ્વિરાડજાયત । વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત । પશ્ચાદ્ભૂમિમથો પુરઃ ॥ ૨ ॥

યત્પુરુષેણ હવિષા । દેવા યજ્ઞમતન્વત । વસન્તો અસ્યાસીદાજ્યમ્ ।

ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ । સપ્તાસ્યાસન્પરિધયઃ । ત્રિઃ સપ્ત સમિધઃ
કૃતાઃ । દેવા યદ્યજ્ઞં તન્વાનાઃ । અબધ્નન્પુરુષં પશુમ્ । તં યજ્ઞં
બર્હિષિ પ્રૌક્ષન્ । પુરુષં જાતમગ્રતઃ ॥ ૩ ॥
તેન દેવા અયજન્ત । સાધ્યા ઋષયશ્ચ યે । તસ્માદ્યજ્ઞાત્સર્વહુતઃ
। સમ્ભૃતં પૃષદાજ્યમ્ । પશૂગ્સ્તાગ્શ્ચક્રે વાયવ્યાન્ ।
આરણ્યાન્ગ્રામ્યાશ્ચ યે । તસ્માદ્યજ્ઞાત્સર્વહુતઃ । ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાગ્સિ જજ્ઞિરે તસ્માત્ । યજુસ્તસ્માદજાયત ॥ ૪ ॥
તસ્માદશ્વા અજાયન્ત । યે કે ચોભયાદતઃ । ગાવો હ જજ્ઞિરે તસ્માત્ ।
તસ્માજ્જાતા અજાવયઃ । યત્પુરુષં વ્યદધુઃ । કતિધા વ્યકલ્પયન્ ।
મુખં કિમસ્ય કૌ બાહૂ । કાવૂરૂ પાદાવુચ્યેતે । બ્રાહ્મણોઽસ્ય મુખમાસીત્ ।
બાહૂ રાજન્યઃ કૃતઃ ॥ ૫ ॥
ઊરૂ તદસ્ય યદ્વૈશ્યઃ । પદ્ભ્યાગ્ શૂદ્રો અજાયત । ચન્દ્રમા મનસો જાતઃ
। ચક્ષોઃ સૂર્યો અજાયત । મુખાદિન્દ્રશ્ચાગ્નિશ્ચ । પ્રાણાદ્વાયુરજાયત ।
નાભ્યા આસીદન્તરિક્ષમ્ । શીર્ષ્ણો દ્યૌઃ સમવર્તત । પદ્ભ્યાં ભૂમિર્દિશઃ
શ્રોત્રાત્ । તથા લોકાગ્ અકલ્પયન્ ॥ ૬ ॥
વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં તમસસ્તુ પારે ।
સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ । નામાનિ કૃત્વાઽભિવદન્, યદાસ્તે
। ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્પ્રદિશશ્ચતસ્રઃ ।
તમેવં વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે । યજ્ઞેન
યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ પ્રથમાન્યાસન્ । તે હ નાકં મહિમાનઃ
સચન્તે । યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૭ ॥
અદ્ભ્યઃ સમ્ભૂતઃ પૃથિવ્યૈ રસાચ્ચ । વિશ્વકર્મણઃ સમવર્તતાધિ
। તસ્ય ત્વષ્ટા વિદધદ્રૂપમેતિ । તત્પુરુષસ્ય વિશ્વમાજાનમગ્રે
। વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં તમસઃ પરસ્તાત્
। તમેવં વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા વિદ્યતેઽયનાય ।
પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ । અજાયમાનો બહુધા વિજાયતે ॥ ૮ ॥
તસ્ય ધીરાઃ પરિજાનન્તિ યોનિમ્ । મરીચીનાં પદમિચ્છન્તિ વેધસઃ ।

યો દેવેભ્ય આતપતિ । યો દેવાનાં પુરોહિતઃ । પૂર્વો યો દેવેભ્યો જાતઃ ।
નમો રુચાય બ્રાહ્મયે । રુચં બ્રાહ્મં જનયન્તઃ । દેવા અગ્રે તદબ્રુવન્ ।
યસ્ત્વૈવં બ્રાહ્મણો વિદ્યાત્ । તસ્ય દેવા અસન્ વશે ॥ ૯ ॥
હ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યૌ । અહોરાત્રે પાર્શ્વે । નક્ષત્રાણિ રૂપમ્ ।
અશ્વિનૌ વ્યાત્તમ્ । ઇષ્ટં મનિષાણ । અમું મનિષાણ । સર્વં મનિષાણ ॥ ૧૦ ॥

## ॥ નારાયણ સૂક્તમ્ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ ॥ સહસ્રશીર્ષં દેવં વિશ્વાક્ષં વિશ્વશમ્ભુવમ્ । વિશ્વં
નારાયણં દેવમક્ષરં પરમં પદમ્ । વિશ્વતઃ પરમાન્નિત્યં વિશ્વં
નારાયણગ્ં હરિમ્ । વિશ્વમેવેદં પુરુષ-સ્તદ્વિશ્વ-મુપજીવતિ । પતિં
વિશ્વસ્યાત્મેશ્વરગ્ં શાશ્વતગ્ં શિવમચ્યુતમ્ । નારાયણં મહાજ્ઞેયં
વિશ્વાત્માનં પરાયણમ્ । નારાયણપરો જ્યોતિરાત્મા નારાયણઃ પરઃ ।
નારાયણપરં બ્રહ્મ તત્ત્વં નારાયણઃ પરઃ । નારાયણપરો ધ્યાતા
ધ્યાનં નારાયણઃ પરઃ । યચ્ચ કિઞ્ચિજ્જગત્સર્વં દૃશ્યતે
શ્રૂયતેઽપિ વા ॥
અન્તર્બહિશ્ચ તત્સર્વં વ્યાપ્ય નારાયણઃ સ્થિતઃ । અનન્તમવ્યયં
કવિગ્ં સમુદ્રેઽન્તં વિશ્વશમ્ભુવમ્ । પદ્મકોશ પ્રતીકાશગ્ં
હૃદયં ચાપ્યધોમુખમ્ । અધો નિષ્ટ્યા વિતસ્ત્યાન્તે નાભ્યામુપરિ
તિષ્ઠતિ । જ્વાલમાલાકુલં ભાતી વિશ્વસ્યાયતનં મહત્ । સન્તતગ્ં
શિલાભિસ્તુ લમ્બત્યાકોશસન્નિભમ્ । તસ્યાન્તે સુષિરગ્ં સૂક્ષ્મં તસ્મિન્
સર્વં પ્રતિષ્ઠિતમ્ । તસ્ય મધ્યે મહાનગ્નિ-ર્વિશ્વાર્ચિ-ર્વિશ્વતોમુખઃ
। સોઽગ્રભુગ્વિભજન્તિષ્ઠન્નાહારમજરઃ કવિઃ ।
તિર્યગૂર્ધ્વમધશ્શાયી રશ્મયસ્તસ્ય સન્તતા । સન્તાપયતિ સ્વં
દેહમાપાદતલમસ્તકઃ । તસ્ય મધ્યે વહ્નિશિખા અણીયોર્ધ્વા વ્યવસ્થિતઃ ।
નીલતો-યદમધ્યસ્થા-દ્વિદ્યુલ્લેખેવ ભાસ્વરા । નીવારશૂકવત્તન્વી

પીતા ભાસ્વત્યણૂપમા । તસ્યાઃ શિખાયા મધ્યે પરમાત્મા વ્યવસ્થિતઃ ।
સ બ્રહ્મ સ શિવઃ સ હરિઃ સેન્દ્રઃ સોઽક્ષરઃ પરમઃ સ્વરાટ્ ॥
ઋતગ્ં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ । ઊર્ધ્વરેતં
વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ।
ૐ નારાયણાય વિદ્મહે વાસુદેવાય ધીમહિ । તન્નો વિષ્ણુઃ પ્રચોદયાત્ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ વિષ્ણુસૂક્તમ્ ॥

ૐ વિષ્ણોર્નુકં વીર્યાણિ પ્રવોચં યઃ પાર્થિવાનિ વિમમે રજાગ્ંસિ
યો અસ્કભાયદુત્તરગ્ં સધસ્થં વિચક્રમાણસ્ત્રેધોરુગાયો
વિષ્ણોરરાટમસિ વિષ્ણોઃ પૃષ્ઠમસિ વિષ્ણોઃ શ્નપ્ત્રેસ્થો
વિષ્ણોસ્સ્યૂરસિ વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવમસિ વિષ્ણવે ત્વા ॥
તદસ્ય પ્રિયમભિપાથો અશ્યામ્ । નરો યત્ર દેવયવો મદન્તિ ।
ઉરુક્રમસ્ય સ હિ બન્ધુરિત્થા । વિષ્ણોઃ પદે પરમે મધ્વ ઉત્સઃ
। પ્રતદ્વિષ્ણુસ્સ્તવતે વીર્યાય । મૃગો ન ભીમઃ કુચરો ગિરિષ્ઠાઃ ।
યસ્યોરુષુ ત્રિષુ વિક્રમણેષુ । અધિક્ષિયન્તિ ભુવનાનિ વિશ્વા । પરો
માત્રયા તનુવા વૃધાન । ન તે મહિત્વમન્વશ્નુવન્તિ ॥
ઉભે તે વિદ્મ રજસી પૃથિવ્યા વિષ્ણો દેવત્વમ્ । પરમસ્ય વિત્સે ।
વિચક્રમે પૃથિવીમેષ એતામ્ । ક્ષેત્રાય વિષ્ણુર્મનુષે દશસ્યન્ ।
ધ્રુવાસો અસ્ય કીરયો જનાસઃ । ઊરુક્ષિતિગ્ં સુજનિમાચકાર । ત્રિર્દેવઃ
પૃથિવીમેષ એતામ્ । વિચક્રમે શતર્ચસં મહિત્વા । પ્રવિષ્ણુરસ્તુ
તવસસ્તવીયાન્ । ત્વેષગ્ગ્હ્યસ્ય સ્થવિરસ્ય નામ ॥
અતો દેવા અવન્તુનો યતો વિષ્ણુર્વિચક્રમે । પૃથિવ્યાસ્સપ્ત ધામભિઃ ।
ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ । સમૂઢમસ્ય પાગ્ંસુરે । ત્રીણિ
પદા વિચક્રમે વિષ્ણુર્ગોપા અદાભ્યઃ । તતો ધર્માણિ ધારયન્ । વિષ્ણોઃ
કર્માણિ પશ્યત યતો વ્રતાનિ પસ્પશે । ઇન્દ્રસ્ય યુજ્યસ્સખા ॥

તદ્વિષ્ણોઃ પરમં પદગ્ં સદા પશ્યન્તિ સૂરયઃ । દિવીવ ચક્ષુરાતતમ્
। તદ્વિપ્રાસો વિપન્યવો જાગૃવાગ્ં સસ્સમિન્ધતે । વિષ્ણો-ર્યત્પરમં
પદમ્ । પર્યાપ્ત્યા અનન્તરાયાય સર્વસ્તોમોઽતિ રાત્ર ઉત્તમ મહર્ભવતિ
સર્વસ્યાપ્ત્યૈ સર્વસ્ય જિત્યૈ સર્વમેવ તેનાપ્નોતિ સર્વં જયતિ ॥ ૐ
શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ શ્રીસૂક્તમ્ ॥

ૐ હિરણ્યવર્ણાં હરિણીં સુવર્ણરજતસ્રજામ્ । ચન્દ્રાં હિરણ્મયીં લક્ષ્મીં
જાતવેદો મ આવહ ॥ તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ । યસ્યાં
હિરણ્યં વિન્દેયં ગામશ્વં પુરુષાનહમ્ ॥ અશ્વપૂર્વાં રથમધ્યાં
હસ્તિનાદ-પ્રબોધિનીમ્ । શ્રિયં દેવીમુપહ્વયે શ્રીર્મા દેવીર્જુષતામ્ ॥

કાં સોસ્મિતાં હિરણ્યપ્રાકારામાર્દ્રાં જ્વલન્તીં તૃપ્તાં તર્પયન્તીમ્ । પદ્મે
સ્થિતાં પદ્મવર્ણાં તામિહોપહ્વયે શ્રિયમ્ ॥ ચન્દ્રાં પ્રભાસાં યશસા
જ્વલન્તીં શ્રિયં લોકે દેવજુષ્ટામુદારામ્ । તાં પદ્મિનીમીં શરણમહં
પ્રપદ્યેઽલક્ષ્મીર્મે નશ્યતાં ત્વાં વૃણે ॥ આદિત્યવર્ણે તપસોઽધિજાતો
વનસ્પતિસ્તવ વૃક્ષોઽથ બિલ્વઃ । તસ્ય ફલાનિ તપસા નુદન્તુ
માયાન્તરાયાશ્ચ બાહ્યા અલક્ષ્મીઃ ॥ ઉપૈતુ માં દેવસખઃ કીર્તિશ્ચ
મણિના સહ । પ્રાદુર્ભૂતોઽસ્મિ રાષ્ટ્રેઽસ્મિન્ કીર્તિમૃદ્ધિં દદાતુ મે ॥

ક્ષુત્પિપાસામલાં જ્યેષ્ઠામલક્ષ્મીં નાશયામ્યહમ્ । અભૂતિમસમૃદ્ધિં
ચ સર્વાં નિર્ણુદ મે ગૃહાત્ ॥ ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં
કરીષિણીમ્ । ઈશ્વરીગ્ં સર્વભૂતાનાં તામિહોપહ્વયે શ્રિયમ્ ॥ મનસઃ
કામમાકૂતિં વાચઃ સત્યમશીમહિ । પશૂનાં રૂપમન્નસ્ય મયિ શ્રીઃ
શ્રયતાં યશઃ ॥ કર્દમેન પ્રજાભૂતા મયિ સમ્ભવ કર્દમ । શ્રિયં
વાસય મે કુલે માતરં પદ્મમાલિનીમ્ ॥ આપઃ સૃજન્તુ સ્નિગ્ધાનિ
ચિક્લીત વસ મે ગૃહે । નિ ચ દેવીં માતરં શ્રિયં વાસય મે કુલે ॥

આર્દ્રાં પુષ્કરિણીં પુષ્ટિં પિઙ્ગલાં પદ્મમાલિનીમ્ । ચન્દ્રાં હિરણ્મયીં
લક્ષ્મીં જાતવેદો મ આવહ ॥ આર્દ્રાં યઃ કરિણીં યષ્ટિં સુવર્ણાં

હેમમાલિનીમ્ । સૂર્યાં હિરણ્મયીં લક્ષ્મીં જાતવેદો મ આવહ ॥ તાં મ આવહ જાતવેદો લક્ષ્મીમનપગામિનીમ્ । યસ્યાં હિરણ્યં પ્રભૂતં ગાવો દાસ્યોઽશ્વાન્, વિન્દેયં પુરુષાનહમ્ ॥

ૐ મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ન્યૈ ચ ધીમહિ । તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ ભૂસૂક્તમ્ ॥

ૐ ભૂમિર્ભૂમ્ના દ્યૌર્વરિણાઽન્તરિક્ષં મહિત્વા । ઉપસ્થે તે દેવ્યદિતેઽગ્નિમન્નાદ-મન્નાદ્યાયાદધે ॥ આઽયઙ્ગૌઃ પૃશ્નિરક્રમી દસનન્માતરં પુનઃ । પિતરં ચ પ્રયન્ત્સુવઃ ॥ ત્રિગ્ંશદ્ધામ વિરાજતિ વાક્પતઙ્ગાય શિશ્રિયે । પ્રત્યસ્ય વહ દ્યુભિઃ ॥ અસ્ય પ્રાણાદપાનત્યન્તશ્ચરતિ રોચના । વ્યખ્યન્ મહિષઃ સુવઃ ॥ યત્ત્વા ક્રુદ્ધઃ પરોવપમન્યુના યદવર્ત્યા । સુકલ્પમગ્ને તત્તવ પુનસ્ત્વોદ્દીપયામસિ ॥ યત્તે મન્યુપરોપ્તસ્ય પૃથિવીમનુદધ્વસે । આદિત્યા વિશ્વે તદ્દેવા વસવશ્ચ સમાભરન્ ॥

મેદિની દેવી વસુન્ધરા સ્યાદ્વસુધા દેવી વાસવી । બ્રહ્મવર્ચસઃ પિતૃણાગ્ શ્રોત્રં ચક્ષુર્મનઃ ॥ દેવી હિરણ્યગર્ભિણી દેવી પ્રસૂવરી । સદને સત્યાયને સીદ । સમુદ્રવતી સાવિત્રીહ નો દેવી મહ્યઙ્ગી । મહીધરણી મહોવ્યથિષ્ઠા-શ્શ઼ૃઙ્ગે શ઼ૃઙ્ગે યજ્ઞે યજ્ઞે વિભીષિણી ॥ ઇન્દ્રપત્ની વ્યાપિની સુરસરિદિહ । વાયુમતી જલશયની શ્રિયન્ધારાજા સત્યન્ધોપરિમેદિની । શ્વોપરિધત્તં પરિગાય । વિષ્ણુપત્નીં મહીં દેવીં માધવીં માધવપ્રિયામ્ । લક્ષ્મીં પ્રિયસખીં દેવીં નમામ્યચ્યુતવલ્લભામ્ ॥

ૐ ધનુર્ધરાયૈ વિદ્મહે સર્વસિદ્ધ્યૈ ચ ધીમહિ । તન્નો ધરા પ્રચોદયાત્ । મહીં દેવીં વિષ્ણુપત્ની-મજૂર્યામ્ । પ્રતીચી મેનાગ્ં હવિષા યજામઃ । ત્રેધા વિષ્ણુરુરુગાયો વિચક્રમે । મહીં દિવં પૃથિવીમન્તરિક્ષમ્ ।

તચ્છ્રોણૈતિશ્રવ-ઇચ્છમાના । પુણ્યગ્ગ્ં શ્લોકં યજમાનાય કૃણ્વતી ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ નીળાસૂક્તમ્ ॥

ૐ ગૃણાહિ । ઘૃતવતી સવિતરાધિપત્યૈઃ પયસ્વતીરન્તિરાશાનો

અસ્તુ । ધ્રુવા દિશાં વિષ્ણુપત્ન્યઘોરાઽસ્યેશાનાસહસોયા મનોતા

। બૃહસ્પતિ-ર્માતરિશ્વોત વાયુસ્સન્ધુવાનાવાતા અભિ નો ગૃણન્તુ ।

વિષ્ટમ્ભો દિવોધરુણઃ પૃથિવ્યા અસ્યેશ્યાના જગતો વિષ્ણુપત્ની ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ દેવીસૂક્તમ્ ॥

ૐ અહં રુદ્રેભિર્વસુભિશ્ચરામ્યહમાદિત્યૈરુત વિશ્વદેવૈઃ ।

અહં મિત્રાવરુણોભા બિભર્મ્યહમિન્દ્રાગ્ની અહમશ્વિનોભા ॥ ૧ ॥

અહં સોમમાહનસં બિભર્મ્યહં ત્વષ્ટારમુત પૂષણં ભગમ્ ।

અહં દધામિ દ્રવિણં હવિષ્મતે સુપ્રાવ્યે એ ૩ યજમાનાય સુન્વતે ॥ ૨ ॥

અહં રાષ્ટ્રી સંગમની વસૂનાં ચિકિતુષી પ્રથમા યજ્ઞિયાનામ્ ।

તાં મા દેવા વ્યદધુઃ પુરુત્રા ભૂરિસ્થાત્રાં ભૂર્યા વેશયન્તીમ્ ॥ ૩ ॥

મયા સોઽઅન્નમત્તિ યો વિપશ્યતિ યઃ પ્રાણિતિ યઈં શ્રૃણોત્યુક્તમ્ ।

અમન્તવોમાન્ત ઉપક્ષિયન્તિ શ્રુધિશ્રુત શ્રદ્ધિવં તે વદામિ ॥ ૪ ॥

અહમેવ સ્વયમિદં વદામિ જુષ્ટં દેવેભિરુત માનુષેભિઃ ।

યં કામયે તં તમુગ્રં કૃણોમિ તં બ્રહ્માણં તમૃષિં તં સુમેધામ્ ॥

૫ ॥

અહં રુદ્રાય ધનુરાતનોમિ બ્રહ્મદ્વિષે શરવેહન્ત વા ઉ ।

અહં જનાય સમદં કૃણોમ્યહં દ્યાવાપૃથિવી આવિવેશ ॥ ૬ ॥

અહં સુવે પિતરમસ્ય મૂર્ધન્ મમ યોનિરપ્સ્વ (અ) ૧ન્તઃ સમુદ્રે ।

તતો વિતિષ્ઠે ભુવનાનુ વિશ્વો તામૂ દ્યાં વર્ષ્મણોપસ્પૃશામિ ॥ ૭ ॥

અહમેવ વાતઽઇવ પ્રવામ્યારભમાણા ભુવનાનિ વિશ્વા ।

પરો દિવા પરએના પૃથિવ્યૈ તાવતી મહિના સમ્બભૂવ ॥ ૮ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ મેધાસૂક્તમ્ ॥

ૐ યશ્છન્દસામૃષભો વિશ્વરૂપઃ । છન્દોભ્યોઽધ્યમૃતાથ્સમ્બભૂવ

। સ મેન્દ્રો મેધયા સ્પૃણોતુ । અમૃતસ્ય દેવધારણો ભૂયાસમ્ । શરીરં મે

વિચર્ષણમ્ । જિહ્વા મે મધુમત્તમા । કર્ણાભ્યાં ભૂરિવિશ્રુવમ્ । બ્રહ્મણઃ

કોશોઽસિ મેધયા પિહિતઃ । શ્રુતં મે ગોપાય । ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ મેધાદેવી જુષમાણા ન આગાદ્વિશ્વાચી ભદ્રા સુમનસ્યમાના ।

ત્વયા જુષ્ટા નુદમાના દુરુક્તાન્ બૃહદ્વદેમ વિદથે સુવીરાઃ । ત્વયા

જુષ્ટ ઋષિર્ભવતિ દેવિ ત્વયા બ્રહ્માઽઽગતશ્રીરુત ત્વયા । ત્વયા

જુષ્ટશ્ચિત્રં વિન્દતે વસુ સાનો જુષસ્વ દ્રવિણો ન મેધે ॥

મેધાં મ ઇન્દ્રો દદાતુ મેધાં દેવી સરસ્વતી । મેધાં મે

અશ્વિનાવુભાવાધત્તાં પુષ્કરસ્રજા । અપ્સરાસુ ચ યા મેધા

ગન્ધર્વેષુ ચ યન્મનઃ । દૈવીં મેધા સરસ્વતી સા માં મેધા

સુરભિર્જુષતાગ્ સ્વાહા । આમાં મેધા સુરભિર્વિશ્વરૂપા હિરણ્યવર્ણા

જગતી જગમ્યા । ઊર્જસ્વતી પયસા પિન્વમાના સા માં મેધા સુપ્રતીકા

જુષન્તામ્ ॥

મયિ મેધાં મયિ પ્રજાં મય્યગ્નિસ્તેજો દધાતુ મયિ મેધાં મયિ પ્રજાં

મયીન્દ્ર ઇન્દ્રિયં દધાતુ મયિ મેધાં મયિ પ્રજાં મયિ સૂર્યો ભ્રાજો

દધાતુ ॥

ૐ હંસ હંસાય વિદ્મહે પરમહંસાય ધીમહિ । તન્નો હંસઃ પ્રચોદયાત્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ નવગ્રહસૂક્તમ્ ॥

ૐ શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્। પ્રસન્નવદનમ્ ધ્યાયેત્સર્વ
વિઘ્નોપશાન્તયે॥ ૐ ભૂઃ ૐ ભુવઃ ઓગ્ં સુવઃ ૐ મહઃ ૐ જનઃ ૐ તપઃ ઓગ્ં
સત્યમ્ ૐ તત્સવિતુર્વરેઽણ્યં ભર્ગોદેવસ્ય ધીમહિ ધિયો યો નઃ
પ્રચોદયાઽત્ ॥ ૐ આપો જ્યોતીરસોઽમૃતં બ્રહ્મ ભૂર્ભુવસ્સુવરોમ્ ॥

મમોપાત્ત-સમસ્ત-દુરિતક્ષયદ્વારા શ્રીપરમેશ્વર પ્રીત્યર્થં આદિત્યાદિ નવગ્રહ દેવતા
પ્રસાદ સિધ્યર્તં આદિત્યાદિ નવગ્રહ નમસ્કારાન્ કરિષ્યે॥

ૐ આસત્યેન રજસા વર્તમાનો નિવેશયન્નમૃતં મર્ત્યઞ્ચ ।
હિરણ્યયેન સવિતા રથેનાઽઽદેવો યાતિભુવના વિપશ્યન્ ॥ અગ્નિં દૂતં
વૃણીમહે હોતારં વિશ્વવેદસમ્ । અસ્ય યજ્ઞસ્ય સુક્રતુમ્ ॥ યેષામીશે
પશુપતિઃ પશૂનાં ચતુષ્પદામુત ચ દ્વિપદામ્ । નિષ્ક્રીતોઽયં યજ્ઞિયં
ભાગમેતુ રાયસ્પોષા યજમાનસ્ય સન્તુ ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય
આદિત્યાય નમઃ ॥ ૧ ॥

ૐ આપ્યાયસ્વ સમેતુ તે વિશ્વતસ્સોમ વૃષ્ણિયમ્ । ભવા વાજસ્ય
સંગથે ॥ અપ્સુમે સોમો અબ્રવીદન્તર્વિશ્વાનિ ભેષજા । અગ્નિઞ્ચ
વિશ્વશમ્ભુવમાપશ્ચ વિશ્વભેષજીઃ ॥ ગૌરી મિમાય સલિલાનિ
તક્ષત્યેકપદી દ્વિપદી સા ચતુષ્પદી । અષ્ટાપદી નવપદી બભૂવુષી
સહસ્રાક્ષરા પરમે વ્યોમન્ ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય સોમાય
નમઃ ॥ ૨ ॥

ૐ અગ્નિર્મૂર્દ્ધા દિવઃ કકુત્પતિઃ પૃથિવ્યા અયમ્ । અપાગ્ંરેતાગ્ંસિ જિન્વતિ ॥
સ્યોના પૃથિવિ ભવાઽનૃક્ષરા નિવેશની । યચ્છાનશ્શર્મ સપ્રથાઃ
॥ ક્ષેત્રસ્ય પતિના વયગ્ંહિતે નેવ જયામસિ । ગામશ્વં પોષયિત્વા સ નો
મૃડાતીદૃશે ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય અઙ્ગારકાય નમઃ ॥ ૩ ॥

ૐ ઉદ્બુધ્યસ્વાગ્ને પ્રતિજાગૃહ્યેનમિષ્ટાપૂર્તે સગ્ંસૃજેથામયઞ્ચ । પુનઃ
કૃણ્વગ્ઁસ્ત્વા પિતરં યુવાનમન્વાતાગ્ંસીત્ત્વયિ તન્તુમેતમ્ ॥ ઇદં
વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ । સમૂઢમસ્યપાગ્ં સુરે ॥ વિષ્ણો
રરાટમસિ વિષ્ણોઃ પૃષ્ઠમસિ વિષ્ણોશ્શ્નપ્ત્રેસ્થો વિષ્ણોસ્સ્યૂરસિ

વિષ્ણોર્ધ્રુવમસિ વૈષ્ણવમસિ  વિષ્ણવે ત્વા ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બુધાય  નમઃ  ॥ ૪ ॥

ૐ બૃહસ્પતે  અતિયદર્યો અર્હાદ્દ્યુમદ્વિભાતિ  ક્રતુમજ્જનેષુ ।
યદ્દીદયચ્છવસર્તપ્રજાત  તદસ્માસુ  દ્રવિણન્ધેહિ ચિત્રમ્ ॥ ઇન્દ્રમરુત્વ ઇહ પાહિ  સોમં  યથા  શાર્યાતે અપિબસ્સુતસ્ય  । તવ  પ્રણીતી  તવ શૂરશર્મન્નાવિવાસન્તિ કવયસ્સુયજ્ઞાઃ ॥ બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતસ્સુરુચો  વેન આવઃ । સબુધ્નિયા  ઉપમા અસ્ય વિષ્ઠાસ્સતશ્ચ  યોનિમસતશ્ચ  વિવઃ  ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય બૃહસ્પતયે  નમઃ  ॥ ૫ ॥

ૐ પ્રવશ્શુક્રાય  ભાનવે  ભરધ્વમ્ । હવ્યં મતિં ચાગ્નયે  સુપૂતમ્ । યો દૈવ્યાનિ  માનુષા જનૂગ્ંષિ  અન્તર્વિશ્વાનિ વિદ્મ ના  જિગાતિ ॥ ઇન્દ્રાણીમાસુ નારિષુ સુપત્નીમહમશ્રવમ્ । ન હ્યસ્યા અપરઞ્ચન જરસા  મરતે પતિઃ  ॥ ઇન્દ્રં  વો વિશ્વતસ્પરિ  હવામહે  જનેભ્યઃ । અસ્માકમસ્તુ  કેવલઃ ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શુક્રાય  નમઃ  ॥ ૬ ॥

ૐ શન્નો  દેવીરભિષ્ટય  આપો  ભવન્તુ પીતયે  । શંયોરભિસ્રવન્તુ નઃ ॥ પ્રજાપતે  ન ત્વદેતાન્યન્યો વિશ્વા  જાતાનિ  પરિતા બભૂવ । યત્કામાસ્તે જુહુમસ્તન્નો  અસ્તુ વયગ્ગ્સ્યામ  પતયો રયીણામ્ ॥ ઇમં યમપ્રસ્તરમાહિ સીદાઽઙ્ગિરોભિઃ પિતૃભિસ્સંવિદાનઃ । આત્વા  મન્ત્રાઃ  કવિશસ્તા વહન્ત્વેના રાજન્, હવિષા  માદયસ્વ ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય શનૈશ્ચરાય નમઃ  ॥ ૭ ॥

ૐ કયા  નશ્ચિત્ર આભુવદૂતી સદાવૃધસ્સખા  । કયા  શચિષ્ઠયા વૃતા ॥ આઽયઙ્ગૌઃ પૃશ્નિરક્રમીદસનન્માતરં  પુનઃ  । પિતરઞ્ચ પ્રયન્ત્સુવઃ  ॥ યત્તે  દેવી નિર્ઋતિરાબબન્ધ  દામ  ગ્રીવાસ્વવિચર્ત્યમ્ । ઇદન્તે  તદ્વિષ્યામ્યાયુષો  ન મધ્યાદથાજીવઃ પિતુમદ્ધિ  પ્રમુક્તઃ ॥ ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતાય રાહવે  નમઃ  ॥ ૮ ॥

ૐ કેતુઙ્કૃણ્વન્નકેતવે  પેશો  મર્યા અપેશસે  । સમુષદ્ભિરજાયથાઃ ॥ બ્રહ્મા દેવાનાં  પદવીઃ કવીનામૃષિર્વિપ્રાણાં મહિષો મૃગાણામ્ ।

શ્યેનોગૃધ્રાણાગ્ સ્વધિતિર્વનાનાગ્ં સોમઃ પવિત્રમત્યેતિ રેભન્
॥ સચિત્ર ચિત્રં ચિતયન્તમસ્મે ચિત્રક્ષત્ર ચિત્રતમં વયોધામ્ ।
ચન્દ્રં રયિં પુરુવીરમ્ બૃહન્તં ચન્દ્રચન્દ્રાભિર્ગૃણતે યુવસ્વ ॥
ૐ અધિદેવતા પ્રત્યધિદેવતા સહિતેભ્યઃ કેતુભ્યો નમઃ ॥ ૯ ॥
॥ ૐ આદિત્યાદિ નવગ્રહ દેવતાભ્યો નમો નમઃ ॥
॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ દશશાન્તયઃ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ
। સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાગ્ંસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ । સ્વસ્તિ
નસ્તાક્ષ્ર્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૐ શાન્તિઃ શાન્તિઃ
શાન્તિઃ ॥

ૐ નમો બ્રહ્મણે નમો અસ્ત્વગ્નયે નમઃ પૃથિવ્યૈ નમ ઓષધીભ્યઃ ।
નમો વાચે નમો વાચસ્પતયે નમો વિષ્ણવે બૃહતે કરોમિ ॥ ૐ શાન્તિઃ
શાન્તિઃ શાન્તિઃ ॥

ૐ નમો વાચે યા ચોદિતા યા ચાનુદિતા તસ્યૈ વાચે નમો નમો વાચે નમો
વાચસ્પતયે નમ ઋષિભ્યો મન્ત્રકૃદ્ભ્યો મન્ત્રપતિભ્યો મામામૃષયો
મન્ત્રકૃતો મન્ત્રપતયઃ પરાદુર્માઽહમૃષીન્મન્ત્રકૃતો
મન્ત્રપતીન્પરાદાં વૈશ્વદેવીં વાચમુદ્યાસગ્ં શિવામદસ્તાં જુષ્ટાં
દેવેભ્યઃ શર્મ મે દ્યૌઃ શર્મપૃથિવી શર્મ વિશ્વમિદં જગત્ ।
શર્મ ચન્દ્રશ્ચ સૂર્યશ્ચ શર્મ બ્રહ્મપ્રજાપતી । ભૂતં વદિષ્યે
ભુવનં વદિષ્યે તેજો વદિષ્યે યશો વદિષ્યે તપો વદિષ્યે બ્રહ્મ વદિષ્યે
સત્યં વદિષ્યે તસ્મા અહમિદમુપસ્તરણમુપસ્તૃણ ઉપસ્તરણં
મે પ્રજાયૈ પશૂનાં ભૂયાદુપસ્તરણમહં પ્રજાયૈ પશૂનાં ભૂયાસં
પ્રાણાપાનૌ મૃત્યોર્માપાતં પ્રાણપાનૌ મા મા હાસિષ્ટં મધુ મનિષ્યે મધુ

જનિષ્યે મધુ વક્ષ્યામિ મધુ વદિષ્યામિ મધુમતીં દેવેભ્યો વાચમુદ્યાસગ્ં
શુશ્રૂષેણ્યાં મનુષ્યેભ્યસ્તં મા દેવા અવન્તુ શોભાયૈ પિતરોઽનુમદન્તુ
॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ શં નો વાતઃ પવતાં માતરિશ્વા શં નસ્તપતુ સૂર્યઃ । અહાનિ શં ભવન્તુ
નશ્શગ્ં રાત્રિઃ પ્રતિ ધીયતામ્ । શમુષાનો વ્યુચ્છતુ શમાદિત્ય ઉદેતુ નઃ ।
શિવા નશ્શન્તમાભવ સુમૃડીકા સરસ્વતિ ।
માતે વ્યોમ સન્દૃશિ । ઇડાયૈવાસ્ત્વસિ વાસ્તુ મદ્વાસ્તુમન્તો ભૂયાસ્મ
મા વાસ્તો-શ્છિથ્સ્મહ્યવાસ્તુસ્સ ભૂયાદ્યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં દ્વિષ્મઃ ।
પ્રતિષ્ઠાસિ પ્રતિષ્ઠાવન્તો ભૂયાસ્મમા
પ્રતિષ્ઠાયા-શ્છિથ્સ્મહ્યપ્રતિષ્ઠસ્સ ભૂયાદ્યોઽસ્માન્દ્વેષ્ટિ યં ચ વયં
દ્વિષ્મઃ । આવાતવાહિ ભેષજં વિવાતવાહિ યદ્રપઃ । ત્વગ્ં હિ વિશ્વભેષજો
દેવાનાં દૂત ઈયસે । દ્વાવિમૌ વાતૌ વાત આસિન્ધોરાપરાવતઃ ॥

દક્ષં મે અન્ય આવાતુ પરાન્યોવાતુ યદ્રપઃ । યદદોવાતતે
ગૃહેઽમૃતસ્ય નિધિર્ હિતઃ । તતો નો દેહિ જીવસે તતો નો ધેહિ ભેષજમ્
। તતો નો મહ આવહ વાત આવાતુ ભેષજમ્ ।
શમ્ભૂર્મયોભૂર્નો હૃદેપ્રણ આયૂગ્ંષિ તારિષત્ । ઇન્દ્રસ્ય ગૃહોઽસિ તં
ત્વા પ્રપદ્યે સગુસ્સાશ્વઃ । સહ યન્મે અસ્તિ તેન । ભૂઃ પ્રપદ્યે ભુવઃ
પ્રપદ્યે સુવઃ પ્રપદ્યે ભૂર્ભુવસ્સુવઃ પ્રપદ્યે વાયું પ્રપદ્યેનાર્તાં
દેવતાં પ્રપદ્યેઽશ્માનમાખણં પ્રપદ્યે પ્રજાપતેર્બ્રહ્મકોશં
બ્રહ્મપ્રપદ્ય ૐ પ્રપદ્યે ।
અન્તરિક્ષં મ ઉર્વન્તરં બૃહદગ્નયઃ પર્વતાશ્ચ યયા વાતઃ
સ્વસ્ત્યા સ્વસ્તિમાન્તયા સ્વસ્ત્યા સ્વસ્તિમાનસાનિ ।
પ્રાણાપાનૌ મૃત્યોર્માપાતં પ્રાણાપાનૌ મા મા હાસિષ્ટં મયિ મેધાં મયિ
પ્રજાં મય્યગ્નિસ્તેજો દધાતુ મયિ મેધાં મયિ પ્રજાં મયીન્દ્ર ઇન્દ્રિયં
દધાતુ મયિ મેધાં મયિ પ્રજાં મયિ સૂર્યો ભ્રાજો દધાતુ ॥

દ્યુભિ-રક્તુભિઃ પરિપાતમસ્માનરિષ્ટેભિરશ્વિના સૌભગેભિઃ । તન્નો
મિત્રો વરુણો મામહન્તામદિતિઃ સિન્ધુઃ પૃથિવી ઉતદ્યૌઃ । કયાનશ્ચિત્ર

આભુવદ્દૂતી સદાવૃધસ્સખા ।
કયાશચિષ્ઠયા વૃતા । કસ્ત્વા સત્યો મદાનાં મગંહિષ્ઠો મત્સદન્ધસઃ ।
દૃઢા ચિદારુજે વસુ । અભીષુણસ્સખીનામવિતા જરિતૃણામ્ ।
શતં ભવાસ્યૂતિભિઃ । વયસ્સુપર્ણા ઉપસેદુરિન્દ્રં પ્રિયમેધા ઋષયો
નાધમાનાઃ । અપધ્વાન્તમૂર્ણુહિ પૂર્ધિચક્ષુર્મુમુગ્ધ્યસ્મન્નિધયેવ
બદ્ધાન્ ।
શં નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે । શંયોરભિસ્રવન્તુ નઃ ॥

ઈશાનાવાર્યાણાં ક્ષયન્તીશ્ચર્ષણીનામ્ । અપો યાચામિ ભેષજમ્ ।
સુમિત્રાન આપ ઓષધયઃ સન્તુ દુર્મિત્રાસ્તસ્મૈ ભૂયાસુર્યોઽસ્માન્દ્વેષ્ટિ
યં ચ વયં દ્વિષ્મઃ ।
આપો હિષ્ઠા મયોભુવસ્તા ન ઊર્જે દધાતન । મહેરણાય ચક્ષસે ।
યો વઃ શિવતમો રસસ્તસ્ય ભાજયતે હ નઃ । ઉશતીરિવ માતરઃ ।
તસ્મા અરઙ્ગમામવો યસ્ય ક્ષયાય જિન્વથ । આપો જનયથા ચ નઃ ।
પૃથિવી શાન્તા સાગ્નિના શાન્તા સામે શાન્તા શુચગ્ં શમયતુ । અન્તરિક્ષગ્ં
શાન્તં તદ્વાયુના શાન્તં તન્મે શાન્તગ્ં શુચગ્ં શમયતુ । દ્યૌશ્શાન્તા
સાદિત્યેન શાન્તા સા મે શાન્તા શુચગ્ં શમયતુ ।
પૃથિવી શાન્તિરન્તરિક્ષગ્ં
શાન્તિ-ર્દ્યૌ-શ્શાન્તિર્દિશ-શ્શાન્તિ-રવાન્તરદિશા-શ્શાન્તિ-રગ્નિ-શ્શાન્તિ-ર્વાયુ-શ્શાન્તિ-રાદિત્ય-શ્શાન્તિ-શ્ચન્દ્રમા-
શ્શાન્તિ-ર્નક્ષત્રાણિ-શાન્તિ-રાપ-શ્શાન્તિ-રોષધય-શ્શાન્તિ-ર્વનસ્પતય-શ્શાન્તિ-ર્ગૌ-શ્શાન્તિ-રજા-શાન્તિ-રશ્વ-
શ્શાન્તિઃ
પુરુષ-શ્શાન્તિ-ર્બ્રહ્મ-શ્શાન્તિ-ર્બ્રાહ્મણ-શ્શાન્તિ-શ્શાન્તિ-રેવ
શાન્તિ-શ્શાન્તિ-ર્મે અસ્તુ શાન્તિઃ ।
તયાહગ્ં શાન્ત્યા સર્વશાન્ત્યા મહ્યં દ્વિપદે ચતુષ્પદે ચ શાન્તિં કરોમિ
શાન્તિર્મે અસ્તુ શાન્તિઃ ॥

એહ શ્રીશ્ચ હ્રીશ્ચ ધૃતિશ્ચ તપો મેધા પ્રતિષ્ઠા શ્રદ્ધા સત્યં
ધર્મશ્ચૈતાનિ મોત્તિષ્ઠન્ત-મનૂત્તિષ્ઠન્તુ મા મામ્ શ્રીશ્ચ હ્રીશ્ચ
ધૃતિશ્ચ તપો મેધા પ્રતિષ્ઠા શ્રદ્ધા સત્યં ધર્મશ્ચૈતાનિ મા

મા હાસિષુઃ ।
ઉદાયુષા સ્વાયુષોદોષધીનાગ્ં રસેનોત્પર્જન્યસ્ય
શુષ્મેણોદસ્થામમૃતાગ્ં અનુ । તચ્ચક્ષુર્દેવહિતં
પુરસ્તાચ્છુક્રમુચ્ચરત્ ।
પશ્યેમ શરદશ્શતં જીવેમ શરદશ્શતં નન્દામ શરદશ્શતં
મોદામ શરદશ્શતં ભવામ શરદશ્શતગ્ં શૃણવામ
શરદશ્શતં પ્રબ્રવામ શરદશ્શતમજીતાસ્સ્યામ શરદશ્શતં
જ્યોક્ચ સૂર્યં દૃશે ।
ય ઉદગાન્મહતોઽર્ણવાદ્વિભ્રાજમાનસ્સરિરસ્ય મધ્યાથ્સમા વૃષભો
લોહિતાક્ષસ્સૂર્યો વિપશ્ચિન્મનસા પુનાતુ ॥
બ્રહ્મણશ્ચોતન્યસિ બ્રહ્મણ આણીસ્થો બ્રહ્મણ આવપનમસિ ધારિતેયં
પૃથિવી બ્રહ્મણા મહી ધારિતમેનેન મહદન્તરિક્ષં દિવં દાધાર
પૃથિવીગ્ં સદેવાં યદહં વેદ તદહં ધારયાણિ મામદ્વેદોઽધિ વિસ્રસત્ ।
મેધામનીષે માવિશતાગ્ં સમીચી ભૂતસ્ય ભવ્યસ્યાવરુધ્યૈ
સર્વમાયુરયાણિ સર્વમાયુરયાણિ ।
આભિર્ગીર્ભિર્યદતોન ઊનમાપ્યાયય હરિવો વર્ધમાનઃ । યદા સ્તોતૃભ્યો
મહિ ગોત્રા રુજાસિ ભૂયિષ્ઠભાજો અધ તે સ્યામ । બ્રહ્મ પ્રાવાદિષ્મ તન્નો
મા હાસીત્ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સં ત્વા સિઞ્ચામિ યજુષા પ્રજામાયુર્ધનં ચ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ
॥

ૐ શં નો મિત્રઃ શં વરુણઃ । શં નો ભવત્વર્યમા । શં ન ઇન્દ્રો
બૃહસ્પતિઃ । શં નો વિષ્ણુરુરુક્રમઃ । નમો બ્રહ્મણે । નમસ્તે વાયો ।
ત્વમેવ પ્રત્યક્ષં બ્રહ્માસિ । ત્વમેવ પ્રત્યક્ષં બ્રહ્મ વદિષ્યામિ । ઋતં
વદિષ્યામિ । સત્યં વદિષ્યામિ । તન્મામવતુ । તદ્વક્તારમવતુ । અવતુ મામ્ ।
અવતુ વક્તારમ્ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવી
સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શં નો

અસ્તુ દ્વિપદે । શં ચતુષ્પદે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ નારાયણોપનિષત્ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ અથ પુરુષો હ વૈ નારાયણોઽકામયત પ્રજાઃ સૃજેયેતિ । નારાયણાત્પ્રાણો જાયતે । મનઃ સર્વેન્દ્રિયાણિ ચ । ખં વાયુર્જ્યોતિરાપઃ પૃથિવી વિશ્વસ્ય ધારિણી । નારાયણાદ્-બ્રહ્મા જાયતે । નારાયણાદ્-રુદ્રો જાયતે । નારાયણાદિન્દ્રો જાયતે । નારાયણાત્પ્રજાપતયઃ પ્રજાયન્તે । નારાયણાદ્દ્વાદશાદિત્યા રુદ્રા વસવસ્સર્વાણિ ચ છન્દાગ્ંસિ । નારાયણાદેવ સમુત્પદ્યન્તે । નારાયણે પ્રવર્તન્તે । નારાયણે પ્રલીયન્તે ॥

ઓમ્ । અથ નિત્યો નારાયણઃ । બ્રહ્મા નારાયણઃ । શિવશ્ચ નારાયણઃ । શક્રશ્ચ નારાયણઃ । દ્યાવાપૃથિવ્યૌ ચ નારાયણઃ । કાલશ્ચ નારાયણઃ । દિશશ્ચ નારાયણઃ । ઊર્ધ્વશ્ચ નારાયણઃ । અધશ્ચ નારાયણઃ । અન્તર્બહિશ્ચ નારાયણઃ । નારાયણ એવેદગ્ં સર્વમ્ । યદ્ભૂતં યચ્ચ ભવ્યમ્ । નિષ્કલો નિરઞ્જનો નિર્વિકલ્પો નિરાખ્યાતઃ શુદ્ધો દેવ એકો નારાયણઃ । ન દ્વિતીયોસ્તિ કશ્ચિત્ । ય એવં વેદ । સ વિષ્ણુરેવ ભવતિ સ વિષ્ણુરેવ ભવતિ ॥

ઓમિત્યગ્રે વ્યાહરેત્ । નમ ઇતિ પશ્ચાત્ । નારાયણાયેત્યુપરિષ્ટાત્ । ઓમિત્યેકાક્ષરમ્ । નમ ઇતિ દ્વે અક્ષરે । નારાયણાયેતિ પઞ્ચાક્ષરાણિ । એતદ્વૈ નારાયણસ્યાષ્ટાક્ષરં પદમ્ । યો હ વૈ નારાયણસ્યાષ્ટાક્ષરં પદમધ્યેતિ । અનપબ્રવસ્સર્વમાયુરેતિ । વિન્દતે પ્રાજાપત્યગ્ં રાયસ્પોષં ગૌપત્યમ્ । તતોઽમૃતત્વમશ્નુતે તતોઽમૃતત્વમશ્નુત ઇતિ । ય એવં વેદ ॥

પ્રત્યગાનન્દં બ્રહ્મ પુરુષં પ્રણવસ્વરૂપમ્ । અકાર ઉકાર મકાર ઇતિ । તાનેકધા

સમભરત્તદેતદોમિતિ । યમુક્ત્વા મુચ્યતે યોગી જન્મસંસારબન્ધનાત્
। ૐ નમો નારાયણાયેતિ મન્ત્રોપાસકઃ । વૈકુણ્ઠભુવનલોકં ગમિષ્યતિ ।
તદિદં પરં પુણ્ડરીકં વિજ્ઞાનઘનમ્ । તસ્માત્તદિદાવન્માત્રમ્ । બ્રહ્મણ્યો
દેવકીપુત્રો બ્રહ્મણ્યો મધુસૂદનોમ્ । સર્વભૂતસ્થમેકં નારાયણમ્ ।
કારણરૂપમકાર પરબ્રહ્મોમ્ । એતદથર્વ શિરોયોઽધીતે પ્રાતરધીયાનો
રાત્રિકૃતં પાપં નાશયતિ । સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ ।
માધ્યન્દિનમાદિત્યાભિમુખોઽધીયાનઃ પઞ્ચપાતકોપપાતકાત્પ્રમુચ્યતે । સર્વ વેદ
પારાયણ પુણ્યં લભતે । નારાયણસાયુજ્યમવાપ્નોતિ નારાયણ સાયુજ્યમવાપ્નોતિ ।
ય એવં વેદ । ઇત્યુપનિષત્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ ઘોષ શાન્તિઃ ॥

ૐ મિત્રોઽસિ વરુણોઽસિ । સમહં વિશ્વૈર્દેવૈઃ । ક્ષત્રસ્ય નાભિરસિ ।
ક્ષત્રસ્ય યોનિરસિ । સ્યોનામાસીદ । સુષદામાસીદ । મા ત્વા હિગ્ંસીત્ । મા મા
હિગ્ંસીત્ । નિષસાદ ધૃતવ્રતો વરુણઃ । પસ્ત્યાસ્વા । સામ્રાજ્યાય સુક્રતુઃ
। દેવસ્ય ત્વા સવિતુઃ પ્રસવે । અશ્વિનોર્બાહુભ્યામ્ । પૂષ્ણો હસ્તાભ્યામ્ ।
અશ્વિનોર્ભૈષજ્યેન । તેજસે બ્રહ્મવર્ચસાયાભિષિઞ્ચામિ । દેવસ્ય ત્વા
સવિતુઃ પ્રસવે । અશ્વિનોર્બાહુભ્યામ્ । પૂષ્ણો હસ્તાભ્યામ્ । સરસ્વત્યૈ
ભૈષજ્યેન । વીર્યાયાન્નાદ્યાયાભિષિઞ્ચામિ ॥

દેવસ્ય ત્વા સવિતુઃ પ્રસવે । અશ્વિનોર્બાહુભ્યામ્ । પૂષ્ણો હસ્તાભ્યામ્ ।
ઇન્દ્રસ્યેન્દ્રિયેણ । શ્રિયૈ યશસે બલાયાભિષિઞ્ચામિ ॥ અર્યમણં
બૃહસ્પતિમિન્દ્રં દાનાય ચોદય । વાચં વિષ્ણુગ્ં સરસ્વતીગ્ં
સવિતારં ચ વાજિનમ્ । સોમગ્ં રાજાનં વરુણમગ્નિમન્વારભામહે ।
આદિત્યાન્, વિષ્ણુગ્ં સૂર્યં બ્રહ્માણં ચ બૃહસ્પતિમ્ । દેવસ્ય ત્વા
સવિતુઃ પ્રસવેઽશ્વિનોર્બાહુભ્યાં પૂષ્ણો હસ્તાભ્યાગ્ં સરસ્વત્યૈ
વાચોયન્તુર્યન્ત્રેણાગ્નેસ્ત્વા સામ્રાજ્યેનાભિષિઞ્ચામીન્દ્રસ્યત્વા
સામ્રાજ્યેનાભિષિઞ્ચામિ બૃહસ્પતેસ્ત્વા સામ્રાજ્યેનાભિષિઞ્ચામિ ॥

દેવાસ્ત્વેન્દ્રજ્યેષ્ઠા વરુણરાજાનોઽધસ્તાચ્ચો પરિષ્ટાચ્ચપાન્તુ ન વા
એતેન પૂતો ન મેધ્યો ન પ્રોક્ષિતોયદેનમતઃ પ્રાચીનં પ્રોક્ષતિ
યત્સઞ્ચિતમાજ્યેન પ્રોક્ષતિ તેન પૂતસ્તેન મેધ્યસ્તેન પ્રોક્ષિતઃ ॥

વસવસ્ત્વા પુરસ્તાદભિષિઞ્ચન્તુ ગાયત્રેણ છન્દસા ।
રુદ્રાસ્ત્વા દક્ષિણતોઽભિષિઞ્ચન્તુ ત્રૈષ્ટુભેન છન્દસા
। આદિત્યાસ્ત્વા પશ્ચાદભિષિઞ્ચન્તુ જાગતેન છન્દસા ।
વિશ્વેત્વા દેવા ઉત્તરતોઽભિષિઞ્ચન્ત્વાનુષ્ટુભેન છન્દસા ।
બૃહસ્પતિસ્ત્વોપરિષ્ટાદભિષિઞ્ચતુ પાઙ્ક્તેન છન્દસા ॥

ઇમાગ્ં રુદ્રાય સ્થિરધન્વને ગિરઃ । ક્ષિપ્રેષવે દેવાય સ્વધામ્ને
॥ અષાઢાય સહમાનાય મીઢુષે । તિગ્માયુધાય ભરતાશ઼ૃણોતન ।
ત્વાદત્તેભીરુદ્ર શન્તમેભિઃ । શતગ્ં હિ મા અશીય ભેષજેભિઃ । વ્યસ્મદ્દ્વેષો
વિતરંવ્યગ્ંહઃ । વ્યમીવાશ્ચાતયસ્વા વિષૂચીઃ ॥
અર્હન્બિભર્ષિ સાયકાનિધન્વ । અર્હન્નિષ્કં યજતં વિશ્વરૂપમ્ ।
અર્હન્નિદન્દયસે વિશ્વમબ્ભુવમ્ । ન વા ઓજીયો રુદ્ર ત્વદસ્તિ ॥

મા નસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
વીરાન્માનો રુદ્ર ભામિતો વધીર્હવિષ્મન્તો નમસા વિધેમ તે ॥

આ તે પિતર્મરુતાગ્ં સુમ્નમેતુ । મા નસ્સૂર્યસ્ય સન્દૃશો યુયોથાઃ । અભિ
નો વીરો અર્વતિ ક્ષમેત । પ્રજાયેમહિ રુદ્ર પ્રજાભિઃ । એવા બભ્રો વૃષભ
ચેકિતાન । યથા દેવ ન હૃણીષે ન હગ્ંસિ । હાવનશ્રૂર્નોરુદ્રેહ બોધિ
। બૃહદ્વદેમ વિદથે સુવીરાઃ ॥

પરિણો રુદ્રસ્ય હેતિર્વૃણક્તુ પરિત્વેષસ્ય દુર્મતિ રઘાયોઃ । અવ
સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ મીઢ્વસ્તોકાય તનયાય મૃડય ॥

સ્તુહિ શ્રુતં ગર્તસદં યુવાનં મૃગં ન ભીમમુપહત્નુમુગ્રમ્ ।
મૃડા જરિત્રે રુદ્ર સ્તવાનો અન્યં તે અસ્મન્નિવપન્તુ સેનાઃ ॥

મીઢુષ્ટમ શિવતમ શિવો નઃ સુમના ભવ । પરમે વૃક્ષ
આયુધન્નિધાય કૃત્તિં વસાન આચર પિનાકં બિભ્રદાગહિ ॥

અર્હન્બિભર્ષિ સાયકાનિ ધન્વ । અર્હન્નિષ્કં યજતં વિશ્વરૂપમ્ ।
અર્હન્નિદં દયસે વિશ્વમબ્ભુવમ્ । ન વા ઓજીયો રુદ્રત્વદસ્તિ ॥
ત્વમગ્ને રુદ્રો અસુરો મહો દિવસ્ત્વગ્ં શર્ધો મારુતં પૃક્ષ ઈશિષે ।
ત્વં વાતૈરરુણૈર્યાસિ શઙ્ગયસ્ત્વં પૂષા વિધતઃ પાસિ નુત્મના ।
આવો રાજાનમધ્વરસ્ય રુદ્રગ્ં હોતારગ્ં સત્યયજગ્ં રોદસ્યોઃ । અગ્નિં
પુરાતનયિત્નોરચિત્તાદ્ધિરણ્યરૂપમવસે કૃણુધ્વમ્ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ શાન્તિમન્ત્રાઃ ॥

॥ ૐ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ યશ્છન્દસામૃષભો વિશ્વરૂપઃ । છન્દોભ્યોઽધ્યમૃતાથ્સમ્બભૂવ
। સ મેન્દ્રો મેધયા સ્પૃણોતુ । અમૃતસ્ય દેવધારણો ભૂયાસમ્ । શરીરં
મે વિચર્ષણમ્ । જિહ્વા મે મધુમત્તમા । કર્ણાભ્યાં ભૂરિવિશ્રુવમ્ ।
બ્રહ્મણઃ કોશોઽસિ મેધયા પિહિતઃ । શ્રુતં મે ગોપાય । ૐ શાન્તિઃ
શાન્તિઃ શાન્તિઃ ॥ ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્ સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ
તન્મામવતુ તદ્વક્તારમવત્વવતુ મામવતુ વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ સર્વાણિ । સર્વં બ્રહ્મૌપનિષદં માઽહં બ્રહ્મ નિરાકુર્યાં મા મા
બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેઽસ્તુ । તદાત્મનિ નિરતે ય ઉપનિષત્સુ
ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૐ ભદ્રં
કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાગ્ંસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ

। સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૐ શાન્તિઃ
શાન્તિઃ શાન્તિઃ ॥ ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે । પૂર્ણસ્ય
પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Rekha Venkatesh

*Vedamantramanjari 2*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*